हितोपदेशकथासु न्यायदर्शनानुसारेण कथायाः (वाद-जल्प-वितण्डायाः) समीक्षात्मकमध्ययनम्

राँची-विश्वविद्यालये संस्कृतविभागे विद्यावारिधिः(Ph.D.) इत्युपाधिप्राप्तये प्रस्तुतोऽयं शोधविषयः

मानविकी-संकायः

2024

शोधप्रबन्धस्य संक्षिप्तसारसंग्रहः

(Synopsis)

शोध-निर्देशिका

डा. कंचन कुमारी

सहायक-प्राध्यापिका, संस्कृतविभागः

कार्तिक-उराँव-महाविद्यालयः, गुमला

अनुसन्धात्री

पूजा दोलइ

NET (NFSC Fellowship)

उपक्रमः

संस्कृतम् अस्माकं निधिः। विश्ववांमये संस्कृतस्य स्थानं सर्वाग्रे। वैदिकवाङ्ग्यान्तरं लौकिकवाङ्ग्यस्य शिलान्यासः भवति। सृष्टेः आदिपर्वे मनुष्याणां मुखे नासीत् किमपि भाषा। संवेदनशीलमनुष्यः स्वस्यभावं प्रकटयितुं सङ्केतस्य उपयोगं कृतवान्। मनुष्याः ज्ञातुं श्रोतुं च सहजातप्रवृत्तेः उत्पन्नः भवति ध्वनिः शब्दः च। एवं प्रकारेण कथायाः उत्पत्तिः मनुष्यस्य साकम् एव अभवत्। कथा प्राचीनकालात् जैष्ठवृद्धाः मतामही पितामहः इत्यादीनां मुखात् मौखिककथानां रुपेण भवति स्म। मौखिकसाहित्यात् लेखितस्वरुपे लेखितुं कदा प्रारम्भः अभवत् तस्मिन् विषये मतभेदाः भवितुमर्हन्तिः। किन्तु कथायाः प्राचीनता एवम् उत्पत्तेः विषये कोऽपि प्रश्नं कर्तुं न शक्नोति ।

पञ्चतन्त्रस्य हितोपदेशस्य च कथाः सम्पूर्णे विश्वे प्रख्याताः सन्ति। एतत् विश्वम् इतिहासप्रेरितम् अस्ति। विश्वप्रख्यातः हितोपदेशस्य विषये वयं जानीमः यत् बहुनां विषयाणां ज्ञानस्य भाण्डारः तत्र निहितः अस्ति इति। तत्र राजनीतिः समाजव्यावस्था नैतिकता वोधपाठाः वाक्चातुर्यः व्यावहरिकता सत्कर्मः आनन्दस्यानुभूतिः युद्धम् इत्यादीनां विषयाणां चर्चा कृता वर्तते। तर्हि तेषां वास्तविकजीवने साम्प्रत्समये च कथं तेषाम् उपयोगः भवति। तस्य कृते तु संशोधनस्य आवश्यकता भविष्यते। नीतिशिक्षाप्रदानाय हितोपदेशः इति ग्रन्थस्य विशेषः अवदानमस्ति। पण्डित नारायणशर्मा पशु-पक्षी काहिनी माध्यमेन ग्रन्थरचनाय वालकाः सर्वे अत्यन्ताकृष्टः जातः । ग्रन्थेऽस्मिन् चत्वारः परिच्छेदाः त्रिचत्वारिंशत् उपकथाः च सन्ति। हितोपदेशग्रन्थे न्यायदर्शनानुसारेण वाक्चातुर्यस्य कृते कथायाः तत्वानि वाद-जल्प-वितण्डायाः विवरणं प्राप्यते।

न्यायदर्शनानुसारेण वाद-जल्प- वितण्डायाः परिचयाः

वादतत्वस्य व्याख्या - तत्वज्ञानस्य इच्छुकौ वादि प्रतिवादिनौ मध्ये शास्त्रार्थकाले यं प्रश्नोत्तरात्मकं संवादं कुरुतः सः संवादः एव "कथा" उच्यते। न्यायदर्शनानुसारेण वादस्य लक्षणम्-"प्रमाण-तर्क-साधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः"। अर्थात् कस्यां विषये पक्षप्रतिपक्षयोः मध्ये केवलं प्रमाण तर्क माध्यमेन स्वपक्षस्थापनं परपक्षखण्डनाञ्च वादः। एतस्मिन् विचारविमर्शरुपे "वादः" कथायां स्व स्व विचारान् प्रमाणपुर्वकम् उपस्थातव्यं भवति। प्रमाणशून्यः कोऽपि विचारः न भवति।

जल्पतत्वस्य निरुपणम् - यत्र न केवलं प्रमाण तर्क माध्यमेन अपि च छल् जाति निग्रह स्थानानां माध्यमेन वादि प्रतिवादिनौ मध्ये स्वपक्षस्थापनं परपक्षखण्डनं च भवति स जल्पः। "यथोक्तोपपन्नश्छल-जाति-निग्रहस्थान-साधनोपालम्भो जल्पः" एषोक्तिद्वारा जल्पस्य लक्षणं सुस्पष्टं भवति। अत्र मुख्यमुद्देश्यम् तत्वनिर्नयः न भवति केवलं विरोधिन् मुद्रितं कृत्वा स्व विजयस्य कामना भवति।

वितण्डातत्वस्य निरुपणम्- एतस्यां कथायाम् एकमेव उद्देश्यं भवति प्रतिपक्षस्य खण्डनम् इति। "स प्रतिपक्षस्थापनाहीनो वितण्डा" एषा उक्तिद्वारा वितण्डायाः लक्षणं सुस्पष्टं भवति। जल्पवितण्डाञ्च कथामध्ये एकमेव अन्तरम् अस्ति यत् जल्पकथायां प्रतिपक्षस्य खण्डनं कृत्वा स्वपक्षस्य साधनं भवति परन्तु वितण्डा कथायां केवलं प्रतिपक्षस्य खण्डनं भवति अपि च स्वपक्षस्य स्थापनाऽपि न भवति।

एकस्मिनगल्पे वादजल्पादि निरुपनम्-

एतस्यां मुख्यकथयाम् वादतत्वस्य निरुपणं दृश्यते। अत्र यदा लघुपतनकः हिरण्यकेन सह मैत्रिं कर्तुम् अनेकान् तर्क-वितर्कान् करोति । लघुपतनकः हिरण्यकेन सह मैत्रिं कर्तुम् इच्छति तदा हिरण्यकः मैत्रिं न कर्तुम् अनेकान् तर्कान् ददाति। लघुपतनकनामा काकः वदति- अतोऽहमपि त्वया सह मैत्रिमिच्छामि, अतो मां मैत्र्येणानुग्रहीतुमर्हसि। एतत् श्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह- कस्त्वम् ? स ब्रुते- लघुपातकनामा वायसोऽहम्। हिरण्यको विहस्याह- का त्वया सह मैत्री? यतः "भक्ष्य-भक्षकयोः प्रीतिर्विपत्तेरेव कारणम्। श्रृगालात्पाशवद्धोऽसौ मृगः काकेन रक्षितः॥ अतोऽहं ब्रवीमि 'भक्ष्यभक्षकयोः प्रीतिः' इत्यादि। काकः पुनराह- भक्षितेनापि भवता नाहारो मम पुष्कलः। त्वयि जीवति जीवामि चित्रग्रीव इवानघ! हिरण्यको ब्रुते- चपलस्त्वम्। चपलेन सह स्नेह सर्वथा न कर्तव्यः। शत्रुपक्षो भवानस्माकम्। लघुपतनको ब्रुते श्रुतं मया सर्वम्। तथापि ममैतावानेव संकल्पः यत् त्वया सह सौहृद्यमवश्यमेव मया करणीयमिति । नो चेदनाहारेणात्मानं तव द्वारि व्यापादयिष्यामि। तथा हि- मृद्घटवत् सुखभेद्य दुःसन्धानश्च दुर्ज्जनो भवति। सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशु सन्धेयः । एतैर्गुणैरुपेतो भवदन्यो मया कः सुहृत्प्राप्तव्यः? इत्यादि तद्वचनमाकर्ण्य हिरण्यको वहिर्निः सृत्याह-आप्यायितोऽहं भवतामनेन वचतामृतेन। अनेन वचनक्रमेण तदेकदूषणमपि त्वयि न लक्षते। यतः पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते। आस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते। तद्भवतु भवतोऽभिमतमेव। एवं प्रकारेण हिरण्यकलघुपतनकौ मध्ये वादः भवति। अत्र मुख्यं मैत्री विषयकम् अस्ति। अत्र उभयोः संवादे ज्ञातुं शक्नुमः यत् कैः मनुषैः सह मैत्री करणीया वा कैः सह न करणीया। एतद् सत्वस्य निर्धारणार्थम् उपरि दत्तः संवादः तत्त्वनिर्णयार्थं योग्यः अस्ति। उभयोः मध्ये संवादः अपि प्रमाणपूर्वकम् अस्ति। प्रमाणपूर्वकं नास्ति एवं संवादः कुत्रापि नास्ति। अतः अत्र न्यायदर्शनानुसारेण वादः तत्वस्य निरुपणं दृश्यते।

अत्र चित्रग्रीवः एवं हिरण्यकयोः मध्ये प्रक्ष-प्रतिपक्ष रुपेण वाद-विवादः भवति। यदा चित्रग्रीवः एवं अन्यखगान् सः पाशेनबंद्धः पश्यति। तदा सः प्रथमं चित्रग्रीवस्य पाशं छेत्तुम् उद्यतः भवति। तदा चित्रग्रीवः स्वस्य मतं स्थापयति – मित्र! मा मैवम्। प्रथमेतेषामस्मदाश्रितानां पाशांस्तावच्छिन्धि। मम पाशं पश्चाच्छेत्स्यसि। हिरण्यकः अत्र स्वस्य मतं स्थापयितुं सः कुपितः सन् वदति- भवति उचितं न उक्तम्। स्वामि प्रथमं बन्धनात् मोचनीयः तद् अनन्तरं भृत्याः मोचनीयाः इति स्वमतं स्थापयति। एवं श्रुत्वा चित्रग्रीवः तस्य मतस्य पुनः एकवारं खण्डनं कृत्वा विजयस्य कामनां करोति। सः वदति एवं मा वद! यतः एते सर्वेऽपि वराकाः कपोताः मामेव आश्रित्य स्थिताः सन्ति। अतः तेषाम् एतावदपि सम्मानं न करोमि चेत् कथम् ? यः राजा सर्वदापि सेवकानाम् अधिकं सम्मानं कतोति सः धनाभाववान् भवति चेदपि तद्विषये सन्तुष्टाः सेवकाः तं कदापि न त्याजन्ति इति। इति प्रमाणम् उक्त्वा सः पुनः स्वस्य विजयं प्राप्तुं सः स्वमतं स्थापयति। हिरण्यकः सर्वं श्रुत्वा स्वस्य पराजयः निश्चितः अस्ति इति मत्वा सः अपि वदति भो! अहं राजधर्मं जनामि। किन्तु भवतः प्ररिक्षा करतिस्म। अत्र हिरण्यकस्य संवादे सः स्वस्य इष्ट अर्थस्य स्वयमेव खण्डनं करोति। अतः अत्र विरोधः नामक निग्रहस्थानं वर्तते। सः स्वयं स्वस्य पराजयस्य स्विकारम् अपि करोति। एवं विविध प्रकारैः ज्ञायते यत् अत्र न्यायदर्शनानुसारेण जल्पतत्वस्य दर्शनं भवति। व्याधेन तण्डुलकणान् विकीर्य्य जालं विस्तीर्णम् एवं स च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्नेव काले चित्रग्रिवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तांस्तण्डुलकणानवलोकयामास। ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान्प्रत्याह- कुतोऽत्र निर्जने वने

तण्डुलकणानां संभवः ? तन्निरुप्यतां तावत्। भद्रमिदं न पश्यामि ।सर्वथाऽविचारितं कर्म न कर्तव्यम्। अत्र चित्रग्रिवः अधः न अवतरयितुं सः कपोतं बोधयिति। तथापि कपोतः तस्य न श्रृणोति एवं स्वस्य पक्षमपि न स्थापयति। केवलम् चित्रग्रिवस्य मतस्य खण्डनम् एव करोति। एवं स्वस्य मतमपि न स्थापयति। अतः अत्र केवलं पर पक्षस्य खण्डनम् एव भवति। स्वपक्षस्य स्थापनं न भवति। अतः अत्र न्यायदर्शानानुसारेण अत्र वितण्डायाः निरुपणं दृश्यते।

योजनासारणि –

हितोपदेशकथासु बहुनि संशोधनकार्याणि जातानि किन्तु "हितोपदेशकथासु न्यायदर्शनसम्मतायाः कथायाः (वाद-जल्प-वितण्डानाम) समीक्षात्मकमध्ययनम्" इति विषयम् अधिकृत्य केनाऽपि कार्यमधिकं कृतं नासीत्। अत्र एतस्मिन् शोधकार्ये हितोपदेशकथायाः अनुसन्धानं च स्वीकृत्य वाद-जल्प-वितण्डानाम् अनुशीलनं भविष्यति। शोधस्य विषयः विभिन्नैः अध्यायैः विभाजयितुं शक्यते। तथ्यस्य संग्रहं कृत्वा तस्य पत्रानुसारं संयोजनं तथा सम्पादनं भविष्यति।

विषयानुक्रमः

प्रथमोऽध्यायः

संस्कृतवाङ्मये कथासाहित्यम् एवं हितोपदेशस्य संक्षिप्तालोचनम्।

द्वितीयोऽध्यायः

दर्शनशास्त्रस्य एवं वाद-जल्प-वितण्डातत्त्वस्य आलोचनम्।

तृतीयोऽध्यायः

मित्रलाभनामके प्रथमे परिच्छेदे वाद-जल्प-वितण्डातत्त्वस्य परिचयः।

चतुर्थोऽध्यायः

सुहृद्भेदनामके द्वितीये परिच्छेदे वाद-जल्प-वितण्डातत्त्वस्य परिचयः।

पञ्चमोऽध्यायः

विग्रहनामके तृतीये परिच्छेदे वाद-जल्प-वितण्डातत्त्वस्य परिचयः।

षष्ठोऽध्यायः

सन्धिनामके चतुर्थे परिच्छेदे वाद-जल्प-वितण्डातत्त्वस्य परिचयः।

उपसंहारः

समग्रेऽस्मिन् गवेषणानिबन्धे हितोपदेशग्रन्थेषु न्यायदर्शनस्य आलोचना, पर्यालोचना, समालोचना भविष्यति। अन्यऽपि नीतिशास्त्रेभ्यः कथं हितोपदेशग्रन्थः सर्वेषां समीपे प्रीयमाणः अभवत् तस्य समीक्षा भविष्यति । प्रस्तुतेऽयं शोधप्रबन्धे हितोपदेशस्य न्यायदर्शनस्य च गुरुत्वं अनुमीयते ।

सहायकग्रन्थसूची-

१. पञ्चतन्त्रम्; प्रो. बालाशास्त्री, चौखम्बा सुरभारती, २०१३
२. हितोपदेशः, श्री तराकुमार कविरत्नः, जे. एन्. व्यानार्जि, कलिकाता, १२४५
३. हितोपदेशः, रामनारायण आचार्यः, चौखम्बा संस्कृत प्रतिष्ठान, २००१
४. हितोपदेशः, पं.रामेश्वर भट्टः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली १९५१
५. हितोपदेशः, प्रो.बालाशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१५
६. हितोपदेशः, सं. कौशल्या, साक्षी प्रकाशन, २०१८
७. न्यायदर्शन् (वात्सायन् भाष्यः), पं.श्री फणिभूषण तर्कवागीशः, पश्चिमवङ्ग रज्य पुस्तक पर्षत्, २०१८
८. न्याय-दर्शन् (हिन्दी व्याख्या), पं.श्री राम शर्मा आचार्यः, संस्कृति संस्थान, बरेली १९६४
९. तर्कभाषा, श्री गङ्गाधर कर न्यायाचार्यः, महावोधि वुक एजेन्सि, २०१९
१०. संस्कृत साहित्येर इतिहासः, धीरेन्द्रनाथ वन्द्योपाध्यायः, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, १९८८
११. संस्कृत साहित्येर भूमिका, श्री सुरेशचन्द्र वन्द्योपाध्याय, श्री नारायणचन्द्र भट्टाचार्य, ए. मुखार्जी अयाण्ड कों प्राः लिः, १३६७
१२. भारतीय दर्शन, डा. सर्वपल्लि राधाकृष्णन्, राजपाल एण्ड सन्स, १९६१

Online Sources

http://archive.org

http://shodhganga.inflibnet.ac.in

http://www.sanskritebooks.org